16. क्षांगोस्थानविधि:- 3पत्र. (ध)

1321

9"x5"

अथ दशवर्ण गोदान विधिः

श्रीगणेशाय नमः अथ दशवर्ण गोदान विधिः तत्र प्रथमतः धेनुदानं ब्राह्मणोपवेशनम्
कलशपूजनं॥ पूजनपूर्वकं ब्राह्मणवरणं॥ गंधपुष्पादिभिरलंकृत्य गोत्रादीन् उच्चार्य यथासंभव
द्रव्यैः धेनुदानार्थं त्वामहं वृणे वृतोस्मीति प्रतिवचनम्॥ गवामंगेषु देवान्न्यसेत् गोभ्यो यज्ञाः समुद्भूताः गोभ्यो
देवाः समुत्थिताः॥ गोभिर्वेदाः समुत्कीर्णाः सषडंगपदक्रमाः शृंगमूले गवां नित्यं ब्रह्मा विष्णुः समाश्रि
तौ॥ शृंगाग्रे सर्वतीर्थानि स्थावराणि चराणि च। शिरोमध्ये महादेवः सर्वभूतमयः स्थितः। ललाट
ग्रे स्थिता देवी नासावंशे च षण्मुखः श्रोत्रयोश्चैव संध्ये द्वे ग्रीवायामिंद्रः संस्थितिः रक्षांसि कुक्षौ देशेषु
साध्याः उरसि संस्थिताः चतुष्पात्सु सकलो धर्मः स्वयं जंघासु संस्थितः खुरमध्येषु गंधर्वाः खुराग्रेषु च
पन्नगाः त्रयस्त्रिंशत्सुरदेवानां कोट्यो रोमसु संस्थिताः यथोक्तन्यासविधिं कृत्वा गंधादिभिरभिपूज्य पत
त्रा ब्रह्मन्निति मंत्रेण हुत्वा ओषधीरिति आयंगौरिति मंत्रेण त्रिः परिक्रम्य नमस्य च अथ प्रार्थना
या लक्ष्मीः सर्वभूतानां मनुष्येषु च या स्थिता धेनुरूपेण सा देवी मम पापं व्यपोहतु विष्णोर्वक्षसि या लक्ष्मी
स्वाहा या च विभावसोः स्वधा पितृणां या देवी सा धेनुर्वरदास्तु मे देहस्थिता च रुद्राणी शंकरस्य च या प्रिया॥
सा देवी धेनुरूपेण मम पापं व्यपोहतु॥ इंद्रादीनां च या लक्ष्मी लक्ष्मीर्धेनुरूपेण संस्थिता॥ घृतं वहति यज्ञा
र्थं मम पापं व्यपोहतु गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः गावो मे हृदये सन्तु गवां मध्ये वसाम्यहं॥ गोपुच्छो
दकेन निमन्तर्पणं कृत्वा विशेषतः तर्पणं कुर्यात् तद्यथा तृप्यतां भगवान् ब्रह्मा विष्णु रुद्रावुभावपि वस्वादि देवताः

ओषधीरिति मातरस्मान्देवीरूपधरे [illegible] आपं गोष्ठिमिदं कृमीदसदन्मान
रंडुरः पितरश्च मरुत्सुः ६

द०व २ सर्वाऋषयःसनकादयः विश्वेदेवाःसदिक्पाला।महतोवसवस्तथा रुद्राश्चादितिपुत्राश्चसाध्याश्चैवमरुद्गणाः
ग्रहनक्षत्रयोगाश्चराशयश्चपदक्रमाः उरगाचार्यानराचार्या गंधर्वाप्सरसस्तथा नागाःसरित्समाभागा
तीर्थानिजलदानदाः मनुष्याश्चपिशाचाश्चसुपर्णापसवोखिलाः दनुजादानवादेवायोगिनःसिद्धकिन्न
राः विद्याधराश्चौषधयोदिग्गजादेवगायनाः एताश्चदेवपत्न्यश्चलोकपालामहानुगाः अनिरुद्धबलाः
श्रीमान्देवजानश्चनारदः असितोदेवलोव्यासो येचान्येऋषिसत्तमाः त्रिविधाजंतवःसर्वेस्थावराजंगमा
अपि तेसर्वेतृप्तिमायांतुगोपुच्छोदकतर्पणैः ततःपदेदये ज्ञातास्तर्पयेत् पितृपक्षेचयेकेचिद्येकेचि
न्मातृपक्षजाः गुरुश्वसुरबंधूनांयेकुलेषुसमुद्भवाः येषांनलुप्तपिंडावैपुत्रदारविवर्जिताः तेसर्वेतृ
प्तिमायांतुगोपुच्छोदकतर्पणैः मनोमेतर्पयदितिमंत्रेणपितृतर्पणंकुर्यात् अग्नयेत्वामहंवरुणाद
दात्विति वरुणस्योत्तभनमसिइतिमंत्रेणदंपतीगोपुच्छोदकंपिबेतां सोमपानेननृनंतुल्यंदंपतिभ्यांहितं
गोलं जलस्याप्यन्नमस्तुमंजलेनतुपरिकल्पयेत् ततोगंधेनसंयुक्तंस्नापयेत्धवारिणा ॥ इतिगोपुच्छो
दकतर्पणं ॥ सोरभेयिसर्वहितेपवित्रेपापनाशिनि प्रतिगृह्णाष्वमेग्रासंमातः त्रैलोक्यवंदिते सौरभे
यिजगन्मातर्देविश्वमातरघापहे मयादत्तमिमंग्रासंग्रस्यतांविष्णुवंदिते अथदानं पापहरसिविष्णो
त्वंपापंहरजनार्दन सर्वपापापनोदायधेनुदानंकरोम्यहम् प्राङ्मुखींगामवस्थाप्यप्रजपुष्पाक्षतैः शुभैः
पत्न्यासहैवदातापित्राङ्मुखः श्रद्धयान्वितः पात्रलक्षणसंयुक्तःप्रतिग्राहीउदङ्मुखः अथसंकल्पः

अद्येत्यादिदेशकालौ स्मृत्वा गोरोमतुल्यदिव्यवर्षसहस्रपर्यन्ताक्षयस्वर्गसुखप्राप्तिकामः कुरुक्षेत्राधि
करणराहुग्रस्तदिवाकरसमयदत्तस्वर्णभारसहस्रजनितफलप्राप्तिकाम इमां दोग्ध्रीं सवत्सां गांय
थालंकृतां वस्त्रद्वयसंवीतां मुक्तालांगूलभूषितां गंधमाल्यादिभिरलंकृतां हेमतिलकभूषितां रुद्रदे
वतां ब्रह्मलोकप्राप्तिकाम अमुकगोत्रायामुकप्रवरायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥ घा
स्वाद्दद्यात्स्वस्तीति ब्रूयात् कोदादिति कामस्तुतिं पठेत् गोदानप्रतिष्ठार्थं सुवर्णमग्निदैवतं अमुकगोत्राय
त्यादि तुभ्यमहं संप्रददे॥ दानांतरं गावो ममाग्रतः संतु इति पठित्वा ततोऽभिषेकं तिलककरणं अग्रेमो
दक्षिणां दद्यात् अथ धन्यादानं वरणादिकं पूर्ववत् अद्येत्यादि इह हि कामुकात्तुष्मिकपापक्षयकाम
आसप्तकुलनरकोद्धारणकामश्चापरपक्षषोडशातिथिश्राद्धफलप्राप्तिकामश्चायुःकामः श्री
कामो धनकामः प्रजाकामो विद्याकामः सुखकामो यशःकामश्च पितृलोकाक्षयस्वर्गकामनया इ
मां ध्रुवर्णां गां सवत्सां पयस्विनीं शृंगद्वयोः सुवर्णालंकृतां रजतभूषितचतुश्चरणां वस्त्रसंवृता
कांस्योपदोहिनीं विशुद्धचमरभूषितपृष्ठां चंदनादिसुगंधोलिप्तां ताम्रपृष्ठीं हेमतिलकादिभिर्यथा
लंकारैरलंकृतां लवणराशिवसंस्थितां रुद्रदैवतां अमुकगोत्राय तुभ्यमहं संप्रददे॥ दानप्रतिष्ठा च गा
वो ममाग्रतः संतु इति पठित्वा अथ कृष्णवर्णा वरणादि पूर्ववत् देशकालौ स्मृत्वा वैतरणीनदीरूप
शोणितवाहिनीं नर्तुकामनया अस्मिपञ्चसुरधारा मार्गनीत्राणनरणिकिरणतप्तवालुकाघोरदर्शन

द २ श्वकालोलूकंकीटश्येनडाकिन्यादिसमस्तभयनामनरकदुःखंतर्त्तुकामनयाऽिमांपयश्वनीमित्यादिरु
द्रदैवतां यमदैवतां वा अग्निलोकप्राप्तिकामनया अमुकगोत्रायेत्यादि तुभ्यमहं संप्रददे । दन प्रतिग्रा
व गावो मम माग्रतः सन्त्विति पठित्वा तिल० अथ गौरवर्णादानं · वरणादि पूर्ववत् अद्येत्यादि कुबेरभ
नप्राप्तिकामः गोरोमतुल्यदिव्यवर्षसहस्रपर्यन्तं कुबेरके प्राप्तिकाम इमां गौरवर्णां गां रुद्रदैवतां अ
मुकगोत्रायेत्यादि तुभ्यमहं संप्रददे शेषं पूर्ववत् अथ रक्ता वरणादि पूर्ववत् अद्येत्यादि कंदर्पाधि
कसौंदर्यप्राप्तिकामनया ऽर्द्धस्याद्यप्सरोगणसेव्यमानारोहणोत्तरसूर्यलोकप्राप्तिकाम इमां रक्तां
गां अमुकगोत्रायेत्यादि पूर्ववत् अथ पीता दानं वरणादि अद्येत्यादि राजसूयाश्वमेधादिसर्वक
तुपुण्यफलप्राप्तिकामः पुष्करादितीर्थगंगादिभरितमज्जनजनितपुण्यफलप्राप्तिकामनया
इमां पीतां गां अमुकगोत्रायेत्यादि पूर्ववत् अथ कृष्णसारवर्णादानं अद्येत्यादि पुष्पकविमाना
रोहणपूर्वकाप्सरोगणगीयमानगंधर्वलोकसुवर्णमयप्रासादनिवासगोष्ठीनृत्यस्त्रीव्यंजनादिक
टुतिक्तकषायाम्लक्षारमधुररसमस्तभक्ष्यभोज्यपेयकर्पूरमिश्रितपयोदकताम्बूलपूगसुगंधि
स्वादितादिभुक्तिकामो अगरुतैलांगलेपनरत्नोज्वलितकंकतिकाकेशसंस्कारसुवर्णशय्योपरि
पयःफेनसमुज्वलतूलिकाकोमलगंडूकाधारपूर्वक हेमाभरणभूषितास्वप्सरोगणकोकह
नस्पेकांत्यप्राप्तिकामो विष्णुलोकप्राप्तिकामः कृष्णसारवर्णां गां अमुकगोत्रायेत्यादि पूर्ववत् अथ २

नीलादानं अद्येत्यादि वैवस्वतदेवादियज्ञप्राप्तिकाम इमां नीलां गां अमुकगोत्रायेत्यादि पूर्ववत् अथ
बहुवर्णदानं अद्येत्यादि अखिलविष्णुमहेश्वरसंदर्शनपूर्वकानवच्छिन्नसोमलोकप्राप्तिकाम इमां
गां बहुवर्णामित्यादि पूर्ववत् अथ कपिला अद्येत्यादि सुरेश्वरदक्षिणादिग्भागे श्रीमद्धरिह
रमूर्त्तिसंनिधौ कपिलागोरोमतुल्यदिव्यसहस्रवर्षपर्यन्तानवच्छिन्नस्वर्गलोकफलप्राप्तिका
म आसप्तकुलनरकोत्तरणकामः कृच्छ्रातिकृच्छ्रपाराकमहापाराकचान्द्रायणसान्तापनप्राजाप
त्यादिनिखिलव्रतफलप्राप्तिकामः पुष्करादितीर्थगंगादिसरिन्निमज्जनार्थफलाभिकामो
दानातिदानफलप्राप्तिकामो ब्राह्म्यादिसर्वलोकेषु निवासकाम इमां कपिलां गामिति पूर्ववत्
अथ वृषभदानं आदित्यपुराणे यो ददाति अनड्वाहं सुशीलं शिववाहनं।। उभयोः पार्श्वयो
र्धृत्वा छत्रोपानहमुत्तमं ।।१।। शीलवन्तं गसंयुक्तं दक्ष श्रेष्ठाय द्विजन्मने युवानमिन्द्रियोपेत
मनड्वाहं वृषरूपिणं ।।गवेन्द्रं ब्राह्मणेन्द्राय स्वर्णशृंगमलंकृतं वृषभं यत्र यच्छति श्रोत्रियाय
द्विजन्मने रोमसंख्यैर्गणोपचीयन्ते चीयमानाः पुनः पुनः यो ददाति वृषं श्रेष्ठं सर्वलक्षणसंयुतं कृत्वा
कंबलपर्याणधारणसज्ञं विचित्रितं वृषपृष्ठे विनिःक्षिप्य पीतवस्त्रविभूषितं गोदानाभ्यामन्नपूर्णा
भ्यां [illegible] हि द्रोणाभ्यां विशेषतः द्रोणाश्चतुर्भिः कुडवैः प्रस्थाश्चत्वार आढकाः अष्टकैतैश्चतुर्भिश्च

द० व३ ध्रौरणाद्यमभिधीयते दानविधानं सुगंधविविधामोदपुष्पचंदनचर्चितं पर्याणोपरिसंस्थाप्य
ब्राह्मणाय निवेदयेत् स्वर्णशृंगं रौप्यखुरं खुवानं वसनान्वितं वृषभं शीलसंपन्नं कंबलेन वि
भूषितं अथ संकल्पः अद्येत्यादि शिवलोकशाश्वतवधि न्न सुखफलप्राप्तिकामः सुगंधपु
ष्पादिभिरर्चितं सर्वरत्नालंकृतकंठाभरणं धारणसूत्रविविधचित्रितपर्याणं छत्रोपानत्सान्नगो
णीदासोभिरच्छादितं सुवर्णशृंगं रौप्यखुरं घंटाचामरभूषितम् अमुं वृषभं रुद्रदैवतं अमुकगोत्रा
येत्यादि तुभ्यमहं संप्रददे। दानप्रतिष्ठां दद्यात्॥ धर्मस्त्वं वृषरूपेण जगदानंदकारक अष्टमूर्तेः
प्रियो यस्मात् तस्मात् शांतिं प्रयच्छ मे यावद् दंतास्य संख्या स्याच्छ्रणसूत्रस्य वै नृप यावत् कंवल
रोम्णां च संख्या पच्चादन्तस्य च घंटाशब्दस्य या संख्या तावत् स्वर्गे महीयते॥ भुक्त्वा तु विविधा
न्भोगान् वीक्ष्यमाणः पुनः पुनः सर्वैश्वर्यगुणोपेते श्रोत्रियाणां महाकुले॥ धनपुत्रशोकर ३
हितः पुत्रपौत्रादिसंवृतः पुनस्तु दानशीलस्याद्वर्तते भूमिमंडले॥ १॥ इति दशावलीगोदा
नविधिः ०ः [illegible] नकेनुसमुत्पन्नेष्वजन्मयदाभवेत् कर्तुस्तत्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति १